DOI: https://doi.org/10.3126/dristikon.v12i1.46138 

# वर्णानामुच्चारणस्थानसमीक्षा

**भवानीशङ्कर भट्टराई, विद्यावारिधि**

सह-प्राध्यापकः

व्याकरणविभागः, पिण्डेश्वर विद्यापीठम्, ने.सं.वि. नेपालः

Email: *dikshitbhattarai072@gmail.com*

**लेखसारः**

प्रस्तुतोऽयं लेखो देवनागरीवर्णेष्वाचार्येण पाणिनिना कृतस्य स्थानविभागस्य समुल्लेखने तत्राधुनिकैर्वैयाकरणैः कृतस्य परिष्कारस्य समीक्षणे च केन्द्रितो वर्तते । एतत्क्रमे लेखोऽयं प्रथमत आचार्येण पाणिनिना निर्धारितानि स्थानानि समुल्लिख्य तत्राधुनिकानां मतानि समीक्षते । अतोऽत्र स्थाननिर्धारणविषये प्राचीनाचार्यैः कृतो विभागः कीदृशोऽस्ति ? तत्रार्वाचीनैः कृतपरिष्कारश्च कीदृगस्तीति शोधप्रश्नं कृत्वा तस्योत्तरं दत्तमस्ति । अनयोः समस्ययोः समाधानायात्र पुस्तकालयतः सम्बद्धाः सामग्रीर्गृहीत्वा वर्णनात्मक-विश्लेषणात्मक-विवेचनात्मकैर्विधिभिस्तथ्याङ्कानां विश्लेषण-मूहापोहनञ्च विधाय निष्कर्षो निष्पादितो वर्तते । विषयविश्लेषणक्रमे संस्कृतव्याकरणे प्रसिद्धस्य निर्वचनविधेः प्रयोगोऽपि यथास्थानं विहितोऽस्ति ।

तिष्ठति यत्र वर्णोत्पादको वायुस्तत् स्थानमिति व्युत्पत्त्या फुस्फुसातो निसृतो वायुः प्रथमं यत्रावरुध्यते स्पृशति वा तदेव स्थानम्, अतो वायोः प्रथमगत्यवरोधस्थानं हि वास्तविकमुच्चारणस्थानमिति निश्चीयते । वर्णानां स्थानमिति शास्त्रीयव्यवहारस्तु औपचारिक एव, न तु वास्तविक इति सर्वैरवगन्तव्यम् । वायोर्विकारो वर्ण इति वाक्यपदीयसिद्धान्ताद् वायोर्विशेषकम्पनम्, शब्दाद्युच्चारणापेक्षया वायोर्बहिरागमनं तन्मध्ये कण्ठताल्वादिष्वभिघात एव वर्णोच्चारणप्रक्रियेति शास्त्रीयं मतम् । देवनागरीवर्णानां स्थानविभाजनपरम्परा वैदिकव्याकरणतः प्रारब्धा दृश्यते । एतादृशं विभाजनं प्रथमत ऋक्प्रातिशाख्येन प्रारब्धं ततः सामाथर्वयजुरादिभिस्तैत्तिरीयादिभिश्च प्रातिशाख्यैः कृतं दृश्यते। प्रातिशाख्यव्याकरणैः कृतं विभाजनमाश्रित्य लौकिकैर्वैयाकरणैरिन्द्रचान्द्रादिभिः तानाश्रित्याचार्येण पाणिनिना कृतं दृश्यते । ततः पाणिनीयपरम्परानुयायिभिरनेकैः संस्कृतवैयाकरणैः स्थानानि विभक्तानि । तत्र पूर्ववर्त्तीनि स्थूलविभाजनानि क्रमशः सूक्ष्मीकृत्य कुत्रचित् संशोध्य च पाणिनीयशिक्षाकारेण- अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा, जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च प्रभृतिभिः शिक्षावाक्यैर्वर्णानां स्थानानि निर्धारितानि, तत्क्रमे नासिकाऽपि स्थाने गृहीता । पाणिनीयशिक्षायां कृतः स स्थानविभागः तदुत्तरवर्त्तिभिः पतञ्जलि-काशिकाकार-नागेश-कैयट-भट्टोजिदीक्षित-प्रक्रियाकौमुदीकृद्भिः विनापरिवर्तनेन समर्थितः । गच्छता काले पाणिनीयशिक्षायां निर्धारितानि तानि स्थानानि पाश्चात्यमतावलम्बिभिर्नेपालैर्भारतीयैश्चाधुनिकैर्भाषाविद्भिराधुनिकैर्ध्वनिरुपकरणैः परीक्ष्य किञ्चित् संशोधितानि । एतत्क्रमे कण्ठ्यस्थानतो हकारो, तालव्यस्थानत इचुशाः, मूर्धा/वर्त्स्यस्थानत ऋकारः, दन्त्यस्थानत लृनलसास्तथा ओष्ठ्यस्थानत उकारश्च निष्कासिताः पुनः स्वरयन्त्रमुखे हकार, वर्त्स्यस्थाने चवर्गनकारलकारसकाराः, ओष्ठ्ये वकारश्च विन्यस्तः । अथर्वप्रातिशाख्ये-नासिक्यवर्णानां नासिकास्थानं नासिकैव करणमित्युक्तमासीत् परमाधुनिकैरेतेषां वर्णानामस्यबहिर्भूतत्वं मत्वा करणत्वं स्वीकृतम् । विभिन्नेषु प्रातिशाख्येषु पाणिनीयशिक्षादिषु च कृतः स्थानविभागस्तात्कालिकानां तद्देशीयानां तज्जातीयानाञ्चोच्चारणानुकूल आसीत्, तदानीमपि प्राच्योदीच्यादिषु देशेषूच्चारणभेद आसीदिति एङ्प्राचां देशे (पा.सू.१-१-७५), उदीचामातः स्थाने एकपूर्वायाः (पा.सू.७-३-४६) प्रभृतिभिः पाणिनीयसूत्रैरवगम्यते । एतेन तात्कालिकी संस्कृतभाषा भरतखण्डे प्रसृता वाग्व्यवहारे प्रयुक्ता गातिशीला चासीदित्यप्यनुमीयते । भाषा गतिशीला भवतीति पक्षेऽथवा महाभारतोत्तरकालाद्

DOI: https://doi.org/10.3126/dristikon.v12i1.46138


वर्णानामुच्चारणपद्धतिः क्रमशः क्षयं गतेति पक्षेऽपि वर्णानामुच्चारणपद्धतिः किञ्चिद् परिवर्तिता इति सर्वैः स्वीकृता दृश्यते, एतेन कालान्तरेण देशान्तरेण वा वर्णानां पूर्वनिर्दिष्टमुच्चारणस्थानं वा तत्सम्बद्धा धारणा परिवर्तितुं शक्नोतीति मन्तव्यम्, प्राचीनैरन्तः साक्ष्येण पुनः पुनरुच्चारणेन कृते विभागेऽर्वाचीनैर्ध्वनिसंयन्त्रैः सूक्ष्मतरेण परीक्षणेन कृतो वर्तते, अतः पूर्वनिर्धारणे जातं परिवर्तनं स्वाभाविकं मन्तव्यमिति लेखसारः ।

*शब्दकुञ्जिका* : उच्चारणस्थानम्, कण्ठताल्वाद्यभिघातः, अन्तःसाक्ष्यम्, परीक्षणम्, प्रातिशाख्यम्

## विषय-परिचयः

देवनागरीलिप्यामनुबन्धितानां स्वरवर्णानां व्यञ्जनानाञ्च कानि स्थानानि ? तानि केभ्यो मुखावयवेभ्य उच्चार्यन्त इति विषये वैदिकव्याकरणप्रातिशाख्यतोऽद्यावधि चिन्तनं तदुपर्यध्ययनं पूर्ववर्त्तिभिः कृते निर्धारणे पुनरवलोकनञ्च समये समये सञ्जातं दृश्यते । विभिन्नैः प्रातिशाख्यकारैः, इन्द्रचान्दादिवैयाकरणैः, पाणिनीयशिक्षाकारेण, आधुनिकैर्भाषावैज्ञानिकैश्च कृतेषु स्थानविभागेष्वनेके मतभेदाः प्राप्यन्ते । प्रस्तुते लघुलेखे तेषां सर्वेषामध्ययनमसम्भवम् । अतः पाणिनीयपरम्परायाः स्थानविभागस्याधुनिकेन विभागेन सह तुलनां कृत्वा द्वयोः किं वैभिन्यम् ? किञ्च वस्तुतथ्यमित्यत्र निर्णीयते ।

### समस्याकथनम्

प्रस्तुतोऽयमालेखोऽधो निर्दिष्टेषु शोधप्रश्नेषु केन्द्रितो भविष्यति-

क) प्राचीनाचार्यैः कृतः स्थानविभागः कीदृशः ?

ख) प्राचीनविभागेऽर्वाचीनैः कृतः परिष्कारः कीदृक् ?

ख) स्थानविभागे कतमः पक्षो ज्यायान् ?

### उद्देश्यकथनम्

प्रस्तुतोऽयमालेखोऽधो निर्दिष्टेषूद्देश्येषु केन्द्रितो भविष्यति-

क) प्राचीनाचार्यैः कृतस्य स्थानविभागस्य निरूपणे,

ख) प्राचीनविभागेऽर्वाचीनैः कृतस्य परिष्कारस्य पर्यालोचने,

ख) स्थानविभागस्य समुचितपक्षपोषणे ।

### औचितिर्महत्त्वञ्च

वैदिककालतोऽद्यावधि देवनागरीवर्णानामुच्चारणस्थाननिर्धारणविषयेऽनेकाश्चर्चा जाता जायमानाश्च दृश्यन्ते । आचार्येण पाणिनिना पूर्ववर्त्तिनां वैयाकरणाचार्याणां स्थाननिर्धारणमाश्रित्य पाणिनीयशिक्षायामष्टौ स्थानानि निर्धारितानि सन्ति । तथैव वृद्धपाठलघुपाठादिष्वप्यनेकधा स्थानानि पृथक्कृतानि सन्त्येव । तेषु कतिपयेषु विभाजनेषु एकस्यैव वर्णस्य पृथग् स्थानम्, नामान्तराण्यपि वृद्धलघुपाठादिषु प्राप्यन्ते, अतो जिज्ञासुषु कस्य वर्णस्य किं स्थानमिति संशयो जागर्ति, तस्य संशयस्य निवारणाय प्रकृतलेख उपयुक्तो भविष्यतीति मन्ये, अतोऽस्य महत्त्वं भाषिकक्षेत्रे व्याकरणे च वरीवर्तते । प्राचीनाचार्येण पाणिनिना निर्धारितेषु वर्णानां स्थानेषु कतिपयैर्नैपालैर्भारतीयैश्चार्वाचीनैराचार्यैर्विप्रतिपत्तिं प्रस्तुत्य तत्र संशोधनमपि विहितमस्ति, तैस्तत्राधुनिकानां ध्वन्युपकरणानामाधारेण पूर्वविभाजनं परिष्कृतमित्युक्तमस्ति, अतस्तैः कृतस्य परिष्कारस्याध्ययनं तदुपरि विश्लेषणमप्यावश्यकमनुभूयते, एतदर्थमपि प्रस्तुतलेखः परिकल्पितो वर्तते। अस्मात् कारणात् प्राचीनार्वाचीनयोस्तुलना, ताभ्यां वस्तुतथ्यस्य निष्पादनमसौ करोतीति लेखस्यास्यौचितिः सिद्ध्यति ।

DOI: https://doi.org/10.3126/dristikon.v12i1.46138


**सैद्धान्तिकपर्याधारः**

वर्णानां स्थाननिर्धारणस्य प्रमुखाधारो ध्वनिविज्ञानम् । विज्ञानमिदं भाषिकध्वनीनामुच्चारणं कथं भवतीति विषयं शरीरविज्ञानसहयोगेनोपस्थापयति (न्यौपाने, २०६८ : ३३) । ध्वनिविज्ञानस्य तिसृषु शाखास्वौच्चारणिकं ध्वनिविज्ञानं वर्णानामुच्चारणस्थानानि निर्धारयति । अतः प्रस्तुतलेखोऽपि तस्यौवौच्चारणिकस्य ध्वनिविज्ञानस्य सैद्धान्तिकपर्याधारपथेन गच्छति । तथैव वर्णविश्लेषणस्य व्यतिरेक-परिपूरकवितरणादयः प्रचलिताः सिद्धान्ता अप्यत्रावलम्बिताः सन्ति । तैराधारैर्देवनागरीव्यञ्जनवर्णानामुच्चारणस्थानान्यत्र निर्धारितानि वर्तन्त इति बोध्यम् । एषु सैद्धान्तिकपर्याधारेषु प्राचीनवर्णविभाजकनियमेषु चायं लेखो निबद्धो वर्तते ।

## सामग्रीसङ्कलनस्य विश्लेषणस्य च विधिः

प्रस्तुतेऽध्ययने पुस्तकालयस्रोतसा सामग्र्यो गृहीताः सन्ति । तस्मिन् क्रमे ध्वनिविज्ञानसम्बद्धानि, व्याकरणशास्त्रस्य स्थानप्रकरणसम्बद्धानि च प्राचीनान्यर्वाचीनानि विषयवस्तूनि गृहीत्वा तानि पारम्परिकेणाधुनिकेन च विधिना सामग्रीर्निर्मथ्य तस्माद् निष्कर्षो निष्पादितो वर्तते । अत्र कति सामग्र्यः शोधप्रबन्धतोऽपि गृहीता वर्तन्ते । ताः प्रायशः द्वितीयकस्रोतोभ्य आनीताः सन्ति ।

गृहीतानां सामग्रीणां विश्लेषणाधारः प्रायो निगमनमूलको वर्णनात्मक-विश्लेषणात्मक-तुलनात्मकविधिरेव वर्तते । एताभिः पद्धतिभिः विश्लिष्य वस्तुतथ्यात्मको निष्कर्षोऽत्र निष्पादितोऽस्ति, अतो गुणात्मकमनुसन्धानमिदमिति सर्वैरवधेयम् ।

## विषयविश्लेषणम्

अतः परं स्थानपरिभाषा-ध्वनेरुच्चारणस्रोतोनिर्देशादिभिर्विषयविश्लेषणमत्र विधीयते ।

**स्थानपरिभाषा**

तिष्ठति यत्र वर्णोत्पादको वायुस्तदिति अथवा स्थीयतेऽत्र इति व्युत्पत्तिकाद् गत्यवरोधार्थकात् ष्ठाधातोः करणाधिकरणयोश्चेत्यधिकरणे ल्युटि सति स्थानपदं सिद्ध्यति । स्थानपदस्य कोऽर्थ इति जिज्ञासायामथर्वप्रातिशाख्यकारः प्राह-यदुपक्रम्यते तत् स्थानम् । येनोपक्रम्यते तत् करणम् (उपक्रमो नाम प्रारम्भः) । स्वराणां यत्रोपसंहारस्तत् स्थानम् । (उपसंहारो नाम संश्लेषविशेषः) यदुपसंहरति तत् करणम् । यत्र स्पर्शनं तत् स्थानम् । येन स्पर्शयति तत् करणम् । एतैर्लक्षणैरुपक्रम उपसंहारे स्पर्शने चाधारः स्थानमिति निश्चीयते । अर्थाद् वर्णोच्चारणाय फुस्फुसातो निसृतो वायुः प्रथमतो यत्र तिष्ठति स्पृशति वा तत् स्थानम्, तथा हि कवर्णोच्चारणाय निसृतो वायुः प्रथमतः कण्ठदेशे तिष्ठति/स्पृशतीति ककारस्य कण्ठं/कण्ठ्यं स्थानमिति ।

वर्णोच्चारणसमये ताल्वादिष्वभिघातेन वायोर्गतिरवरुद्ध्यते तादृशो गत्यवरोधो हि स्थानम् । गत्यवरोधस्तु वायोरेव न तु वर्णानामतस्ताल्वादीनि वर्णोत्पादकवायोरेव स्थानानि । तेषु वर्णस्थानत्वव्यवहारस्तु औपचारिक एव । स्वरवर्णानामुच्चारणकाले कण्ठादिषु देशेषु वायोः सन्निकृष्टतामात्रं भवति चेद् व्यञ्जनानान्तु स्पष्टः स्पर्शो जायते अतो व्यञ्जनानामेवाधुनिकैर्भाषावैज्ञानिकैः कण्ठादीनि स्थानानि निर्धारितानि (फाटकः, २०२९ : १३१) ।

महामुनिना पाणिनिना स्थानेऽन्तरतमः प्रभृतिषु सूत्रेषु स्थानचर्चां कृत्वापि स्थानं न परिभाषितमतो पूर्ववर्त्तिनामुत्तरवर्त्तिनां वा परिभाषामाश्रित्य स्थानं लक्षणीयं भवति । नैपाला भाषाविदोऽपि स्थानं पूर्ववदेव परिभाषन्ते। भाषाविद् मोहनराजशर्मा स्थानं परिभाषयन् प्राह- मुखतः कण्ठतश्च यो ध्वनिरुत्पद्यते स वर्णोच्चारणविन्दुरवय एव

DOI: https://doi.org/10.3126/dristikon.v12i1.46138


स्थानमिति । (शर्मा, २०६२ : ९) अर्थात् वर्णोच्चारणाधारविन्दु एव स्थानमिति तदर्थः । वर्णोच्चारणे जिह्वा ओष्ठश्च यत्र स्पृशति तत् स्थानमिति परिभाषापि प्रचलिता दृश्यते । यथा जिह्वया कण्ठदेशे स्पृष्टे कण्ठम्, मूर्धादेशे स्पृष्टे मूर्धा, दन्तप्रदेशे स्पृष्टे दन्तः, एकेनोष्ठेनापरत्र स्पृष्टे च ओष्ठस्थानमिति भाषाविदामाशयः ।

उपरि दर्शिताभिः स्थानपरिभाषाभिः कण्ठ-तालु-मूर्धा-दन्तोष्ठादीनां स्थानानां विभाजनाधारः फुस्फुसात उपरि उदभूतस्य श्वासस्य प्रथमगतिनिवृत्तिरेवाथवा जिह्वायाः सञ्चलनस्थानमेवेति वक्तुं शक्यम् ।

**ध्वनेरुच्चारणस्रोतः**

अकारहकारादीनां वर्णानामुच्चारणं कथं भवति ? फुस्फुसा (नेपालीभाषायां फोक्सो) अन्तर्गतो वायुरकारादिषु वर्णेषु कथ परिवर्तते ? इत्यादिषु प्रश्नेष्वाधुनिकभाषावैज्ञानिक-पाणिन्योर्विचारावंशतो भिन्नौ प्रतीयेते । तत्राधुनिकाः प्राहुः- "ध्वनिर्वस्तुतो वायोर्घर्षणमेवाथवा वायोर्विशेषकम्पनमेव । वर्णाद्युच्चारणक्रमे मस्तिष्कं प्रथमतोऽभिवदनीयानि वर्ण-पद-वाक्यादीनि निर्धारयति । ततो मस्तिष्कमिदं स्नायुं फुस्फुसाञ्च ध्वन्युच्चारणप्रक्रियासञ्चालनाय निर्दिशति । उपर्युक्तनामङ्गानां प्रेरणया फुस्फुसातो निसृतो वायुः प्रथमं स्वरयन्त्रं ततः कण्ठ-तालु-मूर्धा-दन्तादीनभिहन्ति, एतन्मध्ये श्वासप्रवाह-श्वासदिशा-श्वासमात्रा-कण्ठद्वारादीनामपि समुचितं सन्तुलितञ्च योगदानमपेक्षितं भवतीति ।" (न्यौपाने, २०६८ : ४१-४२) परं पाणिनीयशिक्षायां तथा तत्परम्परायान्तु स्थानप्रयत्ननिर्धारण आधुनिकविभागापेक्षया किञ्चित् भिन्नतरं मतं प्राप्यते । संस्कृतेऽपि वाक्यपदीये वायोर्विकारो वर्ण इत्यस्य विकल्परूपेणाणुमनोविकारौ उल्लिखितौ प्राप्येते । तत्र वाचः तिस्रोऽवस्थाः- पश्यन्ती, मध्यमा, वैखरीति समुल्लिखिता व्याख्याताश्च सन्ति । एताभ्यः प्रागवस्था परा तु योगिनां समाधावेव गम्या, अतस्तस्याध्ययनं भाषाविज्ञानस्य कृते दुस्साध्यमिति वाक्यपदीयकाराभिमतम् । अवशिष्टासु तिसृष्ववस्थासु पश्यन्ती वाक् जीवात्मरूपेणान्तश्चेतसि तिष्ठति । सैव वाक् ध्वनिरूपेण परिवर्तितुकामया प्राणवायौ विवर्तते । ततो जठराग्निना प्रेरितो वायुर्हृदयप्रदेशात् कण्ठप्रदेशान्तमागच्छन् मध्यमारूपतां प्राप्नोति । तत्रैव किं वक्तव्यमिति निर्णीय तदर्थं वर्णकल्पनमपि भवति । ततो मुखप्रदेशाद् निस्सरन् कण्ठ-तालु-दन्तोष्ठ-मूर्धादिष्वभिहत्य वैखरीरूपेण वर्णान् जनयति । तादृशसिद्धान्तं टंकप्रसादन्यौपानेवर्यः स्वकीये भाषाविज्ञानग्रन्थ एवं समुद्धरते-

मूलाधारात् प्रथममुदितो यस्तु भावः पराख्यः
पश्चात् पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्यः ।
वक्त्रे वैखर्यथ रुरुदिवोरस्य जन्तो सुषुम्णा
बद्धस्तस्माद् भवति पवनः प्रेरितः वर्णसंज्ञः ॥ (न्यौपाने, २०५१ : ११२)

पाणिनीयशिक्षानुसारेण तु वर्णोच्चारणनिर्देशक आत्मा एव । सोऽयमात्मा बुद्ध्या सहयोगेनार्थनिर्णयाय भावप्रकटनाय वा प्रथमं मनो नियुङ्क्ते । ततो मनः कायाग्निं कायाग्निश्च वायुं नियोजयन् वर्णोच्चारणार्थमभिप्रेरयति। सोऽयं वायुः प्रथमतो हृदयेऽव्यक्तं ध्वनिमुत्पादयति । ततो मुखविवरे प्राप्तेऽनेकान् ध्वनीन् जनयतीति पाणिनीयशिक्षेत्थं सङ्केतयति-

आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया
मनः कायाग्निमाहन्ति सः प्रेरयति मारुतम् ।
मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ।
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ॥
वर्णान् जनयते ... (आचार्यः, २०६० : ९५६)

DOI: https://doi.org/10.3126/dristikon.v12i1.46138


एतेषु वायोर्विकारः शब्दः, अणोर्विकारः शब्दः, ज्ञानस्य विकारः शब्द इति त्रिषु भिन्नसिद्धान्तेषु वायुविकार शब्द इत्यभिमतं बहुभिरूररीकृतं दृश्यते । अणोर्विकार शब्द इति पक्षं मनोर्विकार इति पक्षं वाऽन्य आधुनिकचिन्तकाः न कुत्रापि चर्चन्ति ।

**वर्णनिर्धारणाधारः**

वर्णोत्पत्तिप्रक्रियायामिव वर्णानामुच्चारणस्थानप्रयत्नयोर्निर्धारणेऽपि पाणिनीय- व्याकरणापेक्षयाऽऽधुनिकं भाषाविज्ञानं सूक्ष्मतरं प्रतीयते । प्राचीना योग-ध्यान-मनन-पुनःपुनरुच्चारणैस्तेषां स्थानादिकं निर्धारयन्ति स्म, परमाधुनिकास्तु ध्वनिरुच्चारकैः- प्लेटोग्राफ (palatograph), ओसिलोग्राफ (oscillograph), इन्क राइटर (ink writer), टेपरिकर्डर (tep recorder), स्पेक्टोग्राफ (spectrograph), स्पिच् ट्रेचर (speech stretcher), पैटर्न प्ले व्याक (pattern playback), काइमोग्राफ प्रभृतिभिर्ध्वनिरुपकरणैः (ढुङ्गेलः, २०६७ : ८०) तान् परीक्ष्य निर्धारयन्ति, अतः प्राचीनविभाजनापेक्ष्ययाऽऽधुनिकं विभाजनं सूक्ष्मतरं स्वाभाविकमेवेति मन्तव्यम्। पुनश्चाधुनिकाः पूर्वाचार्यकृते विभाजने कुत्र त्रुटयः सन्तीति विचारणाय संशोधनावसरं प्राप्नुवन्तीति तेषां वैशिष्टयपूर्णत्वे स्वाभाविकम् । अत्र तुलनार्थं प्राचीनाधुनिकयोरुच्चारणस्थानविभाजनं प्रस्तूयते-

**प्राचीनाधुनिकयोः स्थानविभागः**

अत्र प्राचीनशब्दतः पाणिनीयं विभाजनं गृह्यते चेदाधुनिकशब्देन तु पाश्चात्त्यमतावलम्बिभिर्नेपालैर्भाषाविद्भिः कृतं विभाजनमूररीक्रियते, तेषां विभाजनमधः प्रस्तूयते-

| पाणिनिमतेन | स्थानानि | आधुनिकमतेन स्थानानि |
|---|---|---|
| अ,क,ख,ग,घ,ङ,ह, विसर्गः | कण्ठम्/कण्ठ्यम् | क, ख, ग, घ, ङ । |
| - | स्वरयन्त्रमुखम्/कण्ठमूलीयम् | ह |
| इ,च,छ,ज,झ,ञ,य,श | तालु/तालव्यम् | य |
| ऋ, ट, ठ, ड, ढ, ण, र, ष | मूर्धा | - |
| - | फलकीयवर्त्स्यम् | च, छ, ज, झ, स । |
| - | शिखरवर्त्स्यम् | न, र, ल । |
| - | वर्त्स्यम् | ट,ठ,ड,ढ |
| लृ, त, थ, द, ध, न, ल, स | दन्तः/दन्त्यम् | त,थ,द,ध |
| उ, प, फ, ब, भ, म | ओष्ठम्/ओष्ठ्यम् | प, फ, ब, भ, म, व |
| व | दन्तोष्ठ्यम् | - |
| ए, ऐ | कण्ठतालु | - |
| ओ, औ | कण्ठोष्ठम् | - |
| ङ, ञ, ण, न, म | नासिका | - |
| जिह्वामूलीयविसर्गः | जिह्वामूलम् | - |

यद्यपि कौमुद्यामकुहविसर्जनीयानां कण्ठ इचुयशानां तालुरित्यादिक्रमेण कृतः स्थानविभागो महर्षिणा पाणिनिना पाणिनीयशिक्षायां वृद्धपाठत्वेन, लघुपाठत्वेन च कृतस्य सूक्ष्मविभागस्य सारसङ्क्षेप एवेति युधिष्ठिरमीमांसकः संस्कृतव्याकरणशास्त्रेतिहासनामके ग्रन्थे पाणिनीयशिक्षां समुद्धरनुल्लिखति-

DOI: https://doi.org/10.3126/dristikon.v12i1.46138



***वृद्धपाठे स्थानविभागः-*** *अकुहविसर्जनीयाः कण्ठ्याः । हविर्सनीयावुरस्यावेकेषाम् । जिह्वामूलीयो जिह्वः । कवर्गवर्णानुस्वारजिह्वामूलीया जिह्व्या एकेषाम् । कण्ठ्यनास्यमात्रानित्येके । इचुयशास्तालव्याः । ऋटुरषा मूर्धाः । रेफो दन्तमूलीय एकेषाम्। दन्तमूलस्तु तवर्गः । लृतुलसाः दन्त्याः । वकारो दन्त्योष्ठ्यः । सृक्किणीस्थानमेकेषाम् । उपूपध्मानीया ओष्ठ्याः । अनुस्वारयमा नासिक्याः । कण्ठचनासिक्यमनुस्वारमेके । यमाश्च नासिक्यजिह्वा । ए ऐ कण्ठ्यतालव्यौ । ओ औ कण्ठचोष्ठ्यौ । ञमङणनमाः स्वस्थाननासिकास्थानाः। द्विवर्णानि सन्ध्यक्षराणि । सरेफ ऋवर्णः । संयुक्ता वर्णाः । लघुपाठे वृद्धपाठाद् विशेषस्तु- कवर्गऋवर्णश्च जिह्व्यः । एदैतो कण्ठ्यतालव्यौ । ओदौतो ओष्ठ्यौ । द्वे द्वे वर्णे सन्ध्यक्षराणामारम्भके भवतः (मीमांसकः, २०४१ : ७३)* ।

पुनश्चासौ महर्षिणा पाणिनिना- अकुहविसर्जनीयाः कण्ठ्याः, हविसर्जनीयावुरस्यावेकेषामित्यादिक्रमेण वृद्धपाठे तथा लघुपाठेऽपि प्रायः समानैर्वाक्यैः स्थानानि विभाजितान्यासन्निति ज्ञापयति तथापि महर्षिणा पाठद्वयेऽपि कृतो विभागः सुविस्तृतोऽप्याधुनिकविभागापेक्षया भिन्नतरः, कौमुदीकारेण कृतस्य विभागस्याधारश्चेत्यवधेयम् । प्राच्यनवीनयोर्स्थानविभाग एतदपि वैषम्यं यत् प्राचीनाः 'ञमङणनानां स्ववर्गीयं स्थानं नासिकास्थानञ्च स्वीकुर्वन्ति । नवीनास्तु नासिकां प्रयत्नं कथयन्ति*(अधिकारी, २०४९: ६)*।

## तुलना

प्राचीनाधुनिकाभ्यां कृते स्थानविभागे कतिषु वर्णेषु शाब्दिकभेद एव दृश्यते चेत् क्वचित्तु स्पष्टभेदोऽपि परिलक्ष्यते । तथैव देवनागरीस्वरवर्णेषु संस्कृतज्ञैर्निर्धारितानि कण्ठादीनि स्थानान्याधुनिकैः कथमस्वीकृतानीति विषयेऽपि पुनरन्वेषणमावश्यकम् । तेषां सर्वेषां निरूपणमत्र विधीयते । तेभ्यः प्रथमं स्वराणां कण्ठादिस्थानत्वमुपपद्यते नवेति चर्च्यते ।

## स्वराणां स्थानत्वम्

स्वयं राजन्त इति लक्षणेन स्वरवर्णा व्यञ्जनानां सहयोगं विनापि उच्चार्यन्त इति ज्ञायते । आधुनिकास्तु वर्णोच्चारणोद्देश्येन फुस्फुसातो निसृतो वायुर्विनावरोधेन बहिरागते स्वरत्वमवरोधेन समागते तु व्यञ्जनत्वमुपपद्यत इति परिभाषन्ते । अतो स्वरलक्षण एव प्राचीनाधुनिकयोर्मतभेदः परिलक्ष्यते । अत्र प्राचीना अवरोधविषयमनुद्भावयन् अकारादीनां कण्ठादीनि स्थानानि परिकल्पयन्ति । यथा- अ कण्ठः, इ तालुः, उ ओष्ठौ, ऋ मूर्धा, लृ दन्ताः, एकारैकारौ कण्ठतालू, ओकारौकारौ कण्ठोष्ठौ, अनुस्वारः (-) नासिका, विसर्गः (:) कण्ठ इति । विनाऽवरोधेन वायोर्बहिरागमने स्वराणामुच्चारणमिति पक्षे तेषां कण्ठादिषु देशेषु स्पर्शो न जायते, अत आधुनिकैः स्वराणां स्थानानि न निर्धारितानि स्युः । परमकारोच्चारणाय समुत्थितो वायुः कण्ठदेशमागत्य क्षणार्धमपि तिष्ठतीति अकारककारयोस्तुलनात्मकेनोच्चारणेन ज्ञायते । तथैव इ-य, उ-व, ऋ-र, लृ-लवर्णानामपि । तत्तद्देशेषु वायुरवरुध्यते चेत्तेषां स्थानत्वं कथं न सम्भवतीति प्रश्नो जागर्त्येव । आधुनिकैर्भाषावैज्ञानिकैर्ध्वनिरुपकरणैर्वर्णान् परीक्ष्य स्थानानि निर्धारितानि ततो निष्कर्षत्वेन स्वराणामुच्चारणे कण्ठादीनामावरोधो नास्ति तेषां सङ्कोच ( उपसंहारः) मात्रं जायत इति निर्णीतानि च अतस्तेषां निर्धारणे परीक्षणमात्रं न कारणं प्रातिशाख्यकथनमपि स्रोतः, यथा-

अचां यत्रोपसंहारस्तत् स्थानं क्रियतेऽत्र तु ।
व्यञ्जनानां तु तत् स्थानं स्पर्शनं क्रियते तदा ॥

अर्थात् स्वराणां स्थाननिर्धारणं जिह्वाताल्वादीनां सन्निकृष्टतामात्रेण विधीयते चेद् व्यञ्जनानान्तु स्पर्शेनेति । प्रातिशाख्यस्य प्रकृतं कथनमेवाश्रित्याऽऽधुनिकाः सन्निकृष्टतामात्रेण स्थानत्वं न सम्भवतीति तर्कयन्ति चेत्

DOI: https://doi.org/10.3126/dristikon.v12i1.46138


पाणिन्यादयस्तु सन्निकृष्टतामपि स्थानत्वे कारणं मन्यन्ते । आधुनिका मौखिकैः परीक्षणैः सह ध्वनिरुपकरणैरपि वर्णान् परीक्षितवन्तः, पूर्ववर्त्तिभिः कृते निर्धारणे कुत्र त्रुटयः सन्तीति विवेचितवन्तश्च, अतः प्राचीनविभाजनापेक्षयाऽऽधुनिकं कथनं वस्तुतथ्यसन्निकटमस्तीति वक्तुं शक्यते ।

**प्राचीनानामर्वाचीनाञ्च स्थानानि**

प्राचीना इचुयशानां तालु ऋटुरषाणाञ्च मूर्धा/वर्त्सस्थानमङ्गीकुर्वन्ति चेदाधुनिकास्तु चवर्गटवर्गनरलसां वर्त्स्यं/जिह्वामूलीयं यकारस्य तु तालव्यमुररीकुर्वन्तीति तालिकायामुपरि प्रस्तुतमेव । तरन्त्यनेन वर्णा इति विग्रहपूर्वकात् तृ इत्यस्मात्रुण् रस्य लकारे च कृते तालुशब्दो निष्पद्यते । तस्यार्थो जिह्वेन्द्रियाधिष्ठानं पर्यायश्च काकुद इति । तालुनो जातः तालुनि भवो वा तालव्यः । भाषावैज्ञानिकाः कण्ठप्रदेशाद् वर्त्स्यान्तं जिह्वोपरिस्थं प्रदेशं तालु इत्युक्त्वा तत् कठोरतालु कोमलतालु चेति द्वेधा विभजन्ते । पुनश्च वर्त्स्यसन्निकटकं भागं कठोरं कण्ठनिकटवर्त्तिनञ्च कोमलमिति निर्धारयन्ति । तत्समीप एव मूर्धा/वर्त्सावपि समायातः, अर्थात् कठोरतालुप्रदेशाद् दन्तमूलान्तो भागो वर्त्सः/मूर्धा । चादिभ्रान्तवर्णानां मौखिकोच्चारणे जिह्वाग्र उपरिस्थान् दन्तमूलान् स्पृशतीति त एव प्रकारान्तरेण दन्तमूलीया अपि कथ्यन्ते । परं ञकारोच्चारणे जिह्वाग्रो दन्तमूलान् न स्पृशतीति तस्य दन्तमूलत्वं विचारणीयम्, परं तस्य नासिकास्थानं तु मुखनासिकाभ्यामुच्चारणात् स्वाभाविकं मन्तव्यम् । आधुनिकाः सकारस्यापि वर्त्स्यं स्थानमङ्गीकुर्वन्ति परं चादिभ्रान्ता वर्णा यथा दन्तमूलत उच्चार्यन्ते सकारो न तथेति मौखिकपरीक्षणेन बोद्धुं शक्यते । मौखिकया पद्धत्या परीक्षिते तु सकारोऽयं दन्तमूलतः पश्चप्रदेशादुच्चार्यत इति निश्चितमतः तस्यापि वर्त्स्यत्वं विचारणीयम् । तथैव महामुनिः पाणिनिः सकारस्य दन्तस्थानमुररीकुरुते परं तस्योच्चारणे जिह्वाग्रस्य दन्तप्रदेशेऽस्पर्शः स्पष्टोऽतस्तस्य दन्तत्वमपि चिन्त्यम् । सकारोऽयं न दन्त इति तु तादिधान्तैः सह तस्योच्चारणेनापि ज्ञायते । टादिढान्तानामुच्चारणे तु जिह्वाग्रो दन्तमूलतः किञ्चित् पश्चवर्त्तिनं वर्त्सप्रदेशं स्पृशतीति परीक्षणेन ज्ञायते । तथैव चवर्गटवर्गयोरुच्चारणेऽपि जिह्वाग्रोऽयमेकस्मिन्नेव स्थाने न स्पृशतीति साधारणेन परीक्षणेनाप्यवबुध्यते, अत टवर्गस्य वर्त्स्यत्वं चवर्गस्य तु दन्तमूलीयत्वं स्वाभाविकम् ।

यद्यपि मौखिकपद्धत्या कृतं परीक्षणं स्थाननिर्धारणे न पर्याप्तम्, यतो हि स्थानभेदेन, कालभेदेन, जातिभेदेन, पारिवारिकस्वरूपभेदेन तथा अन्यैरपि बहुविधैभैदैर्वर्णोच्चारणे वैभिन्यं दृग्गोचरीभवति तत् स्वाभाविकमपि, तथापि प्रातिशाख्यकारैः कृतं स्थानविभाजनमाश्रित्य पाणिनीयपरम्परानुयायिभिर्महर्षिभि इचुयशानां तालुरित्यादिभिर्वाक्यैर्यथा स्थानानि विभक्तानि तानि सर्वाण्यधुना यथावन्न घटन्त इति ज्ञातव्यं भवति, नापि चछजझटठडढनरलसा इति सकला उच्चारणकाले वर्त्स्यदेशं स्पृशन्तीत्याधुनिकैः कृतं विभाजनं वस्तुतथ्यात्मकमस्तीति कथयितुं शक्यम्, यद्यत्र पार्थक्यं नासीच्चेत् प्राचीनैः दन्तस्थानी इति कथितः सकार आधुनिकमते वर्त्स्यः कथं स्यादिति प्रश्नो जागर्त्येव, एवमन्यत्रापि कुत्रचिद् भेदोऽस्तीत्युपरि स्थिता तालिका स्पष्टीकरोति, अतोऽस्मत् कृते देश-काल-समय-जाति-पारिवारिकस्वरूपसापेक्षं यन्त्रेण पुनः पुनः परीक्षणीयञ्च स्थाननिर्धारणमावश्यकमिति सारः ।

**नासिकेयं स्थानमुत करणम् ?**

नासिकेयं स्थानमिति पक्षेऽपि करणमिति पक्षेऽपि समीक्षकेषु मतैक्यं न प्राप्यते । अथर्वप्रातिशाख्ये नासिकां स्थानत्वेन करण- (प्रयत्न) त्वेन च प्रस्तुतमस्ति । पाणिन्यादयो बहवो वैयाकरणा स्थानमिति पक्षमवलम्ब्य- अनुस्वारयमानान्तु नासिकास्थानमुच्यते, ञमङणनानां नासिकेत्यादिभिर्वाक्यैः स्थानत्वं स्वीचक्रुश्चेत् कतिपये प्रातिशाख्यकारास्तथा महर्षिः पतञ्जलिस्तु आस्यञ्चोष्ठादारभ्य काकल (किलकिले इति भाषायाम्) पर्यन्तमित्याह- आस्यञ्च ओष्ठात् प्रभृति प्राक् काकलात् (पतञ्जलिः, २००९ : ३०७) अतः पक्षमिममाश्रित्य तां मुखबाह्यत्वमुल्लिखितवन्तोऽतो नासिकाया आस्यबहिर्भूतत्वमन्तर्गत्वमपि विवादग्रस्तं दृश्यते । तुल्यास्यसूत्रे कैयटो वर्णोत्पादकं नासिकास्थानमास्यान्तर्गत्वमेव

DOI: https://doi.org/10.3126/dristikon.v12i1.46138


समुल्लिखितवान् । महर्षिपाणिनिः 'मुखनासिकावचनोऽनुनासिकः' (पा.सू.१-१-९) इति सूत्रे मुखं नासिकाञ्च पृथक्कृत्य प्रस्तुतवान् अतस्तत्समालोचकाः पाणिनिमते नासिकेयमास्यबाह्याऽस्तीति व्याकृतवन्तः । प्रकृतसूत्रस्थं शेखरमुद्धरन् मधुकरफाटको लिखति- मुखनासिकासूत्रे मुखञ्च नासिका चेति विग्रहप्रदर्शनपरस्य भाष्यस्य, तत्रैव सूत्रेऽनुनासिकवर्णविषये प्रासादवासिन्यायप्रदर्शनपरस्य च भाष्यस्य, एवं तुल्यास्यप्रयत्नमित्यत्रास्यस्य स्थानविशेषणार्थकत्वप्रतिपादनपरस्य भाष्यस्य च स्वारस्येन नासिकाया आस्यबाह्यत्वमेव स्वीकर्तुमुचितम् (फाटकः, २०२९ : १३२) इममेव पक्षमङ्गीकृत्य आधुनिका भाषाविदो नासिकां प्रयत्नं मन्यन्ते, अतस्तेषां मते ङ-न-मवर्णानां नासिकास्थानं नास्ति, परं पाणिनीयपरम्परायां नासिकेयं स्थानं कथं जातमिति विचारणीयम् । अत्र तादृशपक्ष एव व्याख्यातृभ्यः समुचितः प्रतीत इत्यापाततो वक्तुं शक्यम् ।

वस्तुतो नासिकाया आस्यबाह्यत्वं स्पष्टमेव अतस्तस्याः करणत्वं समुचितम् । नासिकाशब्देन महाभाष्यकृततल्लक्षणेन व्याख्यातृप्रस्तुतप्रमाणेन च नासिकाया मुखबाह्यत्वं स्पष्टीभवति, अत इमां करणकोटौ निर्धारणीयमिति सारः ।

**निष्कर्षः**

वैदिकैर्वैयाकरणैः स्थूलरूपेण कृतान् स्थानविभागान् आचार्यपाणिनिस्तदनुयायिनश्च सूक्ष्मावलोकनेन पुनर्विभक्तवन्तः, तानूत्तरवर्त्तिनो निःसङ्कोचमात्मसात्कृतवन्तश्च । अद्यत्वे नैपालैर्भारतीयैरपि भाषाविद्भिः कृतानामुच्चारणस्थानविभागानामाधारो महर्षिपाणिनिकृतो विभाग एवेति निश्चप्रचम् । तदानीं वर्णानामुच्चारणस्थाननिर्धारकाणि पैलेटोग्राफ (palatograph), ओसिलोग्राफ (oscillograph), इन्क राइटर (ink writer) प्रभृतीन्युपकरणानि नासन् तथापि वर्णविश्लेषकाः पुनः पुनरुच्चारणेन, अन्तःसाक्ष्येण, मौखिकपरीक्षणादिना च स्थानानि निर्धारितवन्तः । आधुनिका अत्र पूर्वविभागं किञ्चित् विश्लिष्य कतिषु स्थानेषु संशोधनमपि कृतवन्तश्चेत् पाणिनीयपरम्परानुयायिनस्तु संशोधनं सर्वथाऽस्वीकृतवन्तः । अत्र प्राच्याधुनिकयोरेतादृशयोर्मतयोस्तोलनेन प्राप्ता निष्कर्षाः प्रस्तूयन्ते-

१. तिष्ठति यत्र वर्णोत्पादको वायुस्तत् स्थानमिति व्युत्पत्या फुस्फुसातो निसृतो वायुः प्रथमं यत्रावरुद्धो भवति तदेव स्थानम्, अतो वायोर्गत्यवरोधस्थानं हि वास्तविकं स्थानम् । वर्णानां स्थानमिति व्यवहारस्तु औपचारिक एव, न तु वास्तविकः ।
२. वायोर्विकारो वर्ण इति वाक्यपदीयसिद्धान्ताद् वायोर्विशेषकम्पनम्, शब्दाद्युच्चारणापेक्षया वायोर्बहिरागमनं तन्मध्ये कण्ठताल्वादिष्वभिघात एव वर्णोच्चारणप्रक्रिया ।
३. देवनागरीवर्णानां स्थानविभाजनपरम्परा वैदिकव्याकरणतः प्रारब्धा, एतादृशं विभाजनं प्रथमत ऋक्प्रातिशाख्येन प्रारब्धं ततः सामाथर्वयजुरादिभिस्तैत्तिरीयादिभिश्च प्रातिशाख्यैः कृतं दृश्यते ।
४. प्रातिशाख्यव्याकरणैः कृतं विभाजनमुपजीव्यं मत्वा पाणिनीयपरम्परानुयायिभिः संस्कृतवैयाकरणैः स्थानानि विभक्तानि । तत्र पूर्ववर्त्तीनि व्यष्टिविभाजनानि समष्टीकृत्य कुत्रचित् संशोध्य च पाणिनीयशिक्षाकारेण- अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा, जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च प्रभृतिभिः शिक्षावाक्यैर्वर्णानां स्थानानि निर्धारितानि, तत्क्रमे नासिकाऽपि स्थाने गृहीता ।
५. पाणिनीयशिक्षायां कृतः स्थानविभागः तदुत्तरवर्त्तिभिः पतञ्जलि-काशिकाकार-नागेश-कैयट-भट्टोजिदीक्षित-प्रक्रियाकौमुदीकृद्भि विनापरिवर्तनेन समर्थितः ।
६. पाणिनीयशिक्षायां निर्धारितानि स्थानानि पाश्चात्यमतावलम्बिभिः नेपालैर्भारतीयैश्चाधुनिकैः भाषाविद्भिराधुनिकैर्ध्वनिरुपकरणैः परीक्ष्य किञ्चित् संशोधितानि । एतत्क्रमे कण्ठ्यस्थानतो हकारो,

DOI: https://doi.org/10.3126/dristikon.v12i1.46138


तालव्यस्थानत इचुशाः, मूर्धा/वर्त्स्यस्थानत ऋकारः, दन्त्यस्थानत लृनलसास्तथा ओष्ठ्यस्थानत उकारश्च निष्कासिताः पुनः स्वरयन्त्रमुखे हकार, वर्त्स्यस्थाने चवर्गनकारलकारसकाराः, ओष्ठ्ये वकारश्च समावेशितः।

७. अथर्वप्रातिशाख्ये- नासिकानां नासिकास्थानं नासिकैव करणमित्युक्तं तथाप्यन्यत्रेमां आस्यबहिर्भूतकार्यजननात् स्थानाद् बहिर्गण्यते ।

८. विभिन्नेषु प्रातिशाख्येषु पाणिनीयशिक्षायाञ्च कृतः स्थानविभागस्तात्कालिकस्तद्देशीय- स्तज्जातीनां कृत उच्चारणानुकुलश्चासीत्, तदानीमपि प्राच्योदीच्यादिषु क्षेत्रेषु उच्चारणभेद आसीदिति पाणिनीयसूत्रैर्ज्ञायते ।

९. भाषा गतिशीला भवतीति पक्षेऽथवा महाभारतोत्तरकालादुच्चारणपद्धतिः क्रमशो विकृताऽभूदिति पक्षेऽपि वर्णानामुच्चारणपद्धतिः किञ्चिद् परिवर्तिता इति सर्वैरपि स्वीकार्या, अतः प्रातिशाख्यकृते, पाणिनीयशिक्षानिर्दिष्टे आधुनिकैश्च कृते स्थानविभागे यान्त्रिकपरीक्षणपूर्वकं पुनर्विचार आवश्यक इति निष्कर्षः ।

## सन्दर्भसामग्री


अधिकारी, हेमाङ्गराजः (२०४९) *समसामयिक नेपाली व्याकरण,* काठमाडौं : कुन्जल प्रकाशन ।

ढुङ्गेलः, भोजराजः (२०६७) *सामान्य र प्रायोगिक भाषाविज्ञान,* काठमाडौं : एम.के.पब्लिसर्स ।

न्यौपाने, टंकप्रसादः (२०५१) *भाषाविज्ञानको रूपरेखा,* धरान : धरान बुक डिपो ।

न्यौपाने, टंकप्रसादः (२०६८) *सामान्य र प्रायोगिक भाषाविज्ञान,* काठमाडौं : सन लाइट ।

न्यौपाने, टंकप्रसादः (२०६८) *सामान्य र प्रायोगिक भाषाविज्ञान,* काठमाडौं : सनलाइट प्रका. ।

पतञ्जलिः (२००९) *व्याकरणमहाभाष्यम्,* वाराणसी : चौखम्बा विद्या भवन ।

पाण्डेयः, रामाज्ञा (२०४३) *व्याकरणदर्शनपीठिका,* वाराणसी : सम्पूर्णानन्द सं.वि. ।

फाटकः, मधुकरः (२०२९) *पाणिनीयशिक्षायाः शिक्षान्तरैः सह समीक्षा,* वाराणसी : लेखकः ।

भट्टराई, भवानीशङ्करः (२०७५) *शब्दशास्त्रीयव्याख्यानतत्त्वदृष्ट्याऽष्टाध्यायीशारदाप्रभाव्याख्यायाः समीक्षणम् (अप्रकाशितः विद्यावारिधिः शोधः), काठमाडौं : नेपालसंस्कृतविश्वविद्यालयः ।*

मीमांसकः, युधिष्ठिरः (२०४१) *संस्कृतव्याकरणशास्त्र का इतिहास* (तृतीयभागः) हरयाणा : लेखकः ।

शर्माचार्यः, हरिप्रसादः (२०६०) *अष्टाध्यायी (शारदाप्रभाव्याख्या* युता) म.सं. वि. : दाङ-नेपालः ।

शर्मा, मोहनराजः (२०६२) *शब्दरचना र वर्णविन्यास* काठमाडौं : नवीन प्रकाशन ।

शास्त्री, भीमसेनः (व्या.) (१९९३ ई.) *लघुसिद्धान्तकौमुदी* (वरदराज विरचिता), दिल्ली : भैमी प्रका.।